# Yamaproktam Shivarchanopadesham 1

# યમપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

## Document Information

Text title : Yamaproktam Shivarchanopadesham 1

File name : yamaproktaMshivArchanopadesham1.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 27 madhyArjunamahimAnuvarNanam | 640-651||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# યમપ્રોક્તં શિવાર્ચનોપદેશમ્ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શૈવધર્મરતામર્ત્યા ભિત્વાન્તઃ સૂર્યમણ્ડલમ્ ।
પ્રયાન્તિ શિવસાયુજ્યં સ્વેષ્ટબન્ધુસમન્વિતાઃ ॥ ૬૪૦॥

મુને ચરમદેહાનાં શૈવાચારરતાત્મનામ્ ।
મહેશ્વરપ્રસાદેન મુક્તિર્ભવતિ વસ્તુતઃ ॥ ૬૪૧॥

મૃલ્લિઙ્ગપૂજનં શ્રૌતં મોક્ષદં સુલભં મુને ।
કૃતં યેન પ્રયત્નેન સ મુક્તો ભવતિ ધ્રુવમ્ ॥ ૬૪૨॥

મૃલ્લિઙ્ગપૂજામાત્રેણ સદ્યસ્તુષ્યતિ શઙ્કરઃ ।
સન્તુષ્ટઃ સ દદાત્યેવ ભુક્તિં મુક્તિં ચ વસ્તુતઃ (દેહિનામ્) ॥ ૬૪૩॥

મૃલ્લિઙ્ગપૂજનં શ્રૌતં રાજ્યસ્વર્ગાપવર્ગદમ્ ।
તત્કલ્પલતિકેવેષ્ટં કિં કિં નૈવ (વા ન) પ્રયચ્છતિ ॥ ૬૪૪॥

શિવૈકશરણાઃ શૈવાઃ શિવલિઙ્ગાર્ચનપ્રિયાઃ ।
ભુક્ત્વા સ્વાભીપ્સિતાન્ભોગાનન્તે મુક્તા ભવન્તિ ચ ॥ ૬૪૫॥

શૈવેભ્ય એવ દાસ્યામિ મુક્તિમિત્યાહ શઙ્કરઃ ।
અતો મુનેતદન્યેષાં મુક્તિરત્યન્તદુર્લભાઃ ॥ ૬૪૬॥

યેન ચીર્ણં પ્રયત્નેન શ્રૌતમ્પાશુપતં વ્રતમ્ ।
તેન લબ્ધા મુક્તિકાન્તા મહાદેવ પ્રસાદતઃ ॥ ૬૪૭॥

યેન પઞ્ચાક્ષરો જપ્તોભસ્મોદ્ધૂલનપૂર્વકમ્ ।
તેન લબ્ધા મુક્તિકાન્તા મહાદેવ પ્રસાદતઃ ॥ ૬૪૮॥

યેન સ્મૃતો મહાદેવો ભસ્મોદ્ધૂલનપૂર્વકમ્ ।
તેન લબ્ધા મુક્તિકાન્તા મહાદેવ પ્રસાદતઃ ॥ ૬૪૯॥

યેન ધ્યાતો મહાદેવો ભસ્મોદ્ધૂલનપૂર્વકમ્ ।

તેન લબ્ધા મુક્તિકાન્તા મહાદેવ પ્રસાદતઃ ॥ ૬૫૦॥

બહુનોક્તેન કિં વાક્યં સત્યમેતન્મુનેશ઼ૃણુ ।
સર્વાન્દેવાન્પરિત્યજ્ય શિવઃ પૂજ્યો મુમુક્ષુભિઃ ॥ ૬૫૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમપ્રોક્તં શિવાર્ચનોપદેશં ૧ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૭ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૬૪૦-૬૫૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 27 madhyArjunamahimAnuvarNan
. 640-651..

Notes:
Yama યમ; delivers Upadeśa ઉપદેશ about worshiping Śiva શિવ, especially through the worship of the Mṛlliṅga મૃલ્લિઙ્ગ.

Proofread by Ruma Dewan

*Yamaproktam Shivarchanopadesham 1*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*